का नो हानिः Sarva S. –4 Decrease, deficiency; यथा हानिः क्रमप्राप्ता तथा वृद्धिः क्रमागता Hariv.; Y. 2. 207, 244. –5 Neglect, omission, breach; प्रतिज्ञा°, कार्य°. –6 Passing away, waste, loss; कालहानि R. 13. 16. –7 = गतिः (from हा 3 Â.); हानिभङ्गविकल्पानां नवानां संचयेन च Mb. 12. 239. 33. –Comp. –कर a. causing loss, detrimental, injurious; अनादिष्टोऽपि भूपस्य दृष्ट्वा हानिकरं च यः। यतते तस्य नाशाय स भृत्योऽर्हो महीभुजाम् ॥ Pt. 1. 88.

**हापनम्** Causing to quit or abandon, expelling.

**हाङ्गरः** A large fish.

**हाटक** *a.* (–की *f.*) Golden. –कम् 1 Gold; नवहाटकेष्टकचितं ददर्श सः क्षितिपस्य पस्त्यमथ तत्र संसदि Śi. 13. 63. –2 The thorn-apple. –3 A kind of magical drink; या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा Bhāg. 5. 24. 16. –Comp. –ईशः, –ईशानः, –ईश्वरः N. of a form of Śiva; ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः Bhāg. 5. 24. 17. –हाडिका An earthen pot. –गिरिः the mountain Meru.

**हात्रम्** [हा-करणे त्रल्] 1 Wages, hire. –2 Injuring, killing. –3 Death. –त्रः A demon.

**हान्त्रः** Death, dying. –न्त्रम् A demon; Uṇ. 4. 168.

**हापनम्** The act of causing to quit or abandon.

**हापुत्री, हापुत्रिका** A kind of wag-tail.

**हाफिका** Yawning, gaping.

**हायक** *a.* Giving up, abandoning; नैव धर्मी न चाधर्मी पूर्वोपचितहायकः Mb. 14. 19. 7.

**हायनः, –नम्** A year; त्रस्तैकहायनकुरङ्गविलोलदृष्टेः U. 3. 28; Māl 4. 8. –नः 1 A kind of rice. –2 A flame.

**हारः** [हृ-कर्मणि घञ्] 1 Taking away, removal, seizing. –2 Conveying. –3 Abstraction, deprivation. –4 A carrier, porter. –5 A garland or necklace of pearls &c.; a necklace in general; हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले Amaru. 100; पाण्ड्योऽयमंसार्पितलम्बहारः R. 6. 60; 5. 52; 6. 16; Me. 74; Ṛs. 1. 4; 2. 18. –6 War, battle. –7 (In math.) The denominator of a fraction. –8 A divisor. –9 (In prosody) A long syllable. –Comp. आवलिः, –ली *f.* 1 a string of pearls; तरुणीस्तन एव शोभते मणिहारावलिरामणीयकम् N. 2. 44; हारावलीतरलकाञ्चितकाञ्चिदाम Gīt. 11. –2 N. of a vocabulary of uncommon words by पुरुषोत्तमदेव. –गुटि (लि) का the bead or pearl of a necklace; ताम्रोदरेषु पतितं तरुपल्लवेषु निर्धौतहारगुलिकाविशदं हिमाम्भः R. 5. 70. –फलम्, –फलकम् a necklace of five strings. –यष्टिः *f.* a necklace, string of pearls; दधति पृथुकुचाग्रैरुन्नतैर्हारयष्टिम् Ṛs. 2. 25; 1. 8; Ki. 9. 2. –हारा a kind of reddish-brown grape.

**हारकः** [हृ-ण्वुल्] 1 A thief, plunderer; लवणहारकः Y. 3. 215. –2 A cheat, rogue. –3 A string of pearls. –4 A divisor (in math.) –5 A kind of prose composition. –6 A gambler. –7 A kind of science.

**हारि** *a.* Attracting, captivating, pleasing, charming. –रिः *f.* 1 Defeat. –2 Losing a game. –3 A body of travellers, caravan. –Comp. –कण्ठः a cuckoo.

**हारित** *p. p.* 1 Caused to be taken or seized. –2 Presented, offered. –3 Attracted. –4 Robbed, carried. –5 Lost; हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता Pt. 5. 85. –6 Surpassed, exceeded. –तः 1 The green colour. –2 A kind of pigeon; कांस्यं हृत्वा तु दुर्बुद्धिर्हारितो जायते नरः Mb. 13. 111. 102.

**हारितकः** A green vegetable.

**हारहूरः** Spirituous liquor. –रा A grape.

**हारिण** *a.* (–णी *f.*) Belonging to a deer. –णम् Venison, flesh of deer.

**हारिणिकः** A deer-catcher, hunter.

**हारिन्** *a.* (–णी *f.*) [हारो अस्त्यस्य इनि, हृ-णिनि वा] 1 Taking, conveying, carrying. –2 Robbing, taking away; वाजिकुञ्जराणां च हारिणः Y. 2. 273; 3. 208. –3 Seizing, disturbing; तद्रजो प्रतिपं विद्यात् सततं हारि देहिनाम् Ms. 12. 28. –4 Obtaining, securing. –5 Attracting, captivating, pleasing, delighting, ravishing; तवास्मि गीतरागेण हारिणा प्रसभं हृतः Ś. 1. 5; Śi. 10. 13, 69; विष्टपहारिणि हरौ Bh. 2. 25. –6 Surpassing, exelling. –7 Having a necklace.

**हारिद्रः** 1 A yellow colour; हारिद्रवर्णं सुसुखं च शुक्रम् Mb. 12. 280. 33. –2 The Kadamba tree. –3 A kind of vegetable poison. –4 A kind of fever. –द्रम् Gold; तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम् N. 6. 45; 7. 13. –*a.* yellow, yellow-coloured.

**हारी** *f.* A pearl; L. D. B.

**हारीतः** 1 A kind of pigeon; मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः R. 4. 46. –2 A rogue, cheat. –3 N. of a writer of a Smṛiti or code of laws; Y. 1. 4.

**हार्दम्** [हृदयस्य कर्म युवा० अण् हृदादेशः] 1 Affection, love; अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः Ki. 1. 33; Śi. 9. 69; V. 5. 10. –2 Kindness, tenderness. –3 Will. –4 Intention, meaning; अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना Bhāg. 1. 7. 55. –*a.* Relating to or being in the heart; संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिम् Bhāg. 11. 13. 33.

**हार्दिक्यः** 1 N. of Kṛita-varman; Mb. 1. 2. 32; मुञ्च हार्दिक्य शङ्काम् । Ve. 3. 7. –2 Friendship.

**हार्दिन्** *n.* Anything greatly liked or desired.